श्रीसोमनाथसंस्कृविश्वविद्यालयग्रन्थमाला – १९

# संस्कृतवाङ्मये नगररचना

प्रधानसम्पादकः
**प्रो. गोपबन्धुमिश्रः**
कुलपतिः, श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

सम्पादकाः
**डॉ. दीपेशः कतिरा**, सहायकाचार्यः
**डॉ. ललितकुमारः पटेलः**, सहाचार्यः
**जिगरभट्टः**, सहायकाचार्यः
श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

**श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्, गुजरातम्**

श्रीसोमनाथसंस्कृविश्वविद्यालयग्रन्थमाला – १९

# संस्कृतवाङ्मये नगररचना

प्रधानसम्पादकः

**प्रो. गोपबन्धुमिश्रः**

कुलपतिः, श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

सम्पादकाः

**डॉ. दीपेशः कतिरा**, सहायकाचार्यः

**डॉ. ललितकुमारः पटेलः**, सहाचार्यः

**जिगरभट्टः**, सहायकाचार्यः

श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

**श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्, गुजरातम्**

**प्रकाशकः -**

**डॉ. दशरथजादवः**
कुलसचिवः
श्रीसोमनाथसंस्कृतयुनिवर्सिटी,
राजेन्द्रभुवन रोड, वेरावलम् - ३६२ २६६
गीर-सोमनाथजनपदम्, गुजरातराज्यम्
दूरभाषः - ०२८७६ - २४४५३२, फेक्सः २४४४१७
E-mail: sssu.veraval@gmail.com
Web: www.sssu.ac.in

**सहायकसम्पादकः समन्वयकश्च**

डॉ. कार्तिकपण्ड्या
संशोधनाधिकारी,
श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

***© Shree Somnath Sanskrit University, 2020***

**संस्करणम्** - प्रथमम्

**वर्षम्** - मार्च - २०२०

**प्रतिकृतयः** - ३५०

**ISBN** - 978-93-83097-40-1

**मूल्यम्** - ₹२३०/-

**मुद्रकः** - जलाराम ग्राफिक्स एन्ड ऑफसेट
परमहंस एपार्टमेन्ट के पास, होटेल कावेरी के पीछे,
एस. टी. रोड, वेरावल-३६२ २६६,
जि. गीर-सोमनाथ, गुजरात (भारत)
दूरभाष - ०२८७६-२२१८६१

Shree Somnath Sanskrit University Grantha Series - 19

# Town Planning
# in Sanskrit Literature

*Chief Editor*
**Prof. Gopabandhu Mishra**
Vice-Chancellor
Shree Somnath Sanskrit University, Veraval

*Editors*
**Dr. Dipesh Katira,** Assistant Professor
**Dr. Lalitkumar Patel,** Associate Professor
**Jigar Bhatt,** Assistant Professor
Shree Somnath Sanskrit University, Veraval

**Shree Somnath Sanskrit University - Veraval - Gujarat**

**Published by:**

**Dr. Dashrath Jadav**
Registrar
Shree Somnath Sanskrit University
Rajendra Bhuvan Road, Veraval - 362 266.
Dist.: Gir-Somnath, Gujarat, India.
Phone: 02876-244532, Fax: 02876-244417
E-mail: sssu.veraval@gmail.com
www.sssu.ac.in

**Assistant Editor & Co-ordinator:**
Dr. Kartik Pandya
Research Officer
Shree Somnath Sanskrit University, Veraval.

***© Shree Somnath Sanskrit University, 2020***

All rights reserved. No part of this publication may be reproduced, stored in a retrieval system or transmitted in any form or by any means, electronic or mechanical, including photocopying, recording or otherwise, without the written permission from the publisher.

**Edition** : First

**Year** : March - 2020

**Copies** : 350

**Price** : ₹230/-

**ISBN** : 978-93-83097-40-1

**Printed by** : Jalaram Graphics & Offset
Nr. Paramhans Appartment, B/h. Hotel Kaveri
S. T. Road, Veraval - 362 266
Dist.: Gir-Somnath, Gujarat, India.
Phone: 02876-221861

## अनुक्रमणिका..


I शुभाशंसनम् vi

II प्रास्ताविकम् ix

१ प्राचीनभारतीयशिल्पशास्त्र के अनुसार नगररचनाशास्त्र ०१
**लेखक –** प्रा. अशोक सदाशिव नेने

२ शिल्पशास्त्रों में ग्राम एवम् नगर रचना के प्रकार ००
**लेखक –** बिजय प्रसाद उपाध्याय

३ वैदिक वाङ्मय में ग्राम–नगर–रचना ००
**लेखक –** लीना हुन्नरगीकर

४ पुराणेषु नगरयोजना ००
**लेखक –** प्रो० सन्तोष कुमार शुक्लः

५ उपग्रह की दृष्टि से हमारे प्राचीन भारत वर्ष के वैश्विक–कॉस्मिक–नगर ००
**लेखक –** डॉ. प्रभु ठक्कर

६ आश्रम–ग्राम–पुर–नगर ००
**लेखक –** डॉ. गिरीश ठाकर

७ संस्कृत साहित्य में निरूपित द्वारिका ००
**लेखक –** डॉ. योगिनी हिमांशु व्यास

८ समराङ्गणसूत्रधार ग्रन्थानुसार नगरनिर्माणे मार्गव्यवस्था ००
**लेखक –** डॉ. हेमुबेन राठोड

९ संस्कृतवाङ्मयानुसारं नगरे जलव्यवस्था ००
**लेखक –** डॉ. ललितकुमार पटेल

१० संस्कृतवाङ्मये नगरे सामाजिकभवनविचार: ००
**लेखक –** जिगर भट्ट

११ नारद शिल्पशास्त्र में नगर रचना के सन्दर्भ ००
**लेखक –** आचार्य श्रेयस एवं अनुराग देशपांडे

१२ श्रीमद्वाल्मीकीयरामायणे बालकाण्डे अयोध्याकाण्डे च नगरनिर्माणम् ००
**लेखक –** डॉ. पङ्कजकुमार एस्. रावल

१३ संस्कृततवाङ्मय में वडनगर ००
**लेखक –** प्रो. डॉ. अम्बालाल प्रजापति

श्रीः

## शुभाशंसनम्

'संस्कृतवाङ्मये नगररचना' इति शीर्षकमाश्रित्य सरदारपटेल-विश्वविद्यालयेन संस्कृतभारत्या च सह सम्मिलिततत्त्वावधानेन श्रीसोमनाथसंस्कृतविश्वविद्यालयपक्षतः विद्यानगरे गतवर्षे समायोजितायां राष्ट्रियसंगोष्ठ्याम् उपस्थापितानां चितानां शोधलेखानामिदं संकलनं संस्कृतवाङ्मये नगररचनेति तुल्याभिधानाभिधायि अस्माकं विश्वविद्यालयद्वारा प्रकाश्यमानमिति परमोऽयं मोदावसरः।

परमात्मना सर्वेषां प्राणिनामिव मानवानां शरीरं तस्य सर्वोपयोगित्वं कल्याणकारित्वं च मनसि निधाय रचितमिति निश्चप्रचम्। पार्थिवेषु शरीरधारिषु सर्वश्रेष्ठत्वेन मानवोऽपि यथा यथा बौद्धिकविकासस्य ऊर्ध्वम् ऊर्ध्वतरं च स्तरमारोढुं प्रायतत तथा तथा केवलं नैजं सर्वस्वं मनसि अनिधाय गणजीवनं तद्गतं च सौख्यं स्वेतरेषां समेषामपि कल्याणं विमृश्य विविधभौतिकपदार्थानामन्वयं परिकल्प्य यानि कानि नानाविधसुखसाधनानि समरचयत्, तेषु आश्रम – ग्राम - नगरादिरचनम् अत्यन्तं प्रशस्तमासीत्। तदारभ्य वर्तमानकालं यावत् मनुष्यः सूच्चप्रासादपरिखा-मार्ग-जलाशयादिसहितानि बृहन्ति व्यापकानि च नगराणि रचयन्नेवास्ति। किन्तु सामान्यतः आधुनिके काले नगररचनासङ्कल्पनाप्रसङ्गे भारतवर्षे प्राचीनकालतः आरभ्य युगानि यावत् यद् नगररचनाकौशलं तद्गतं च वैशिष्ट्यम् अविद्यत, तस्याकलनं तन्मूल्याङ्कनपुरःसरं तद्गतश्रेयस्त्वानुसरणं नैव विद्यते। अत एवेदमत्यन्तं प्रासङ्गिकं सन्दर्भमादाय संस्कृतवाङ्मये नगररचनाविषयकं तथ्यमुररीकृत्य साम्प्रतिकगृहप्रासादनगररचनाविधौ तस्योपयोगः तेन चाभीष्टसिद्धिः सम्यग्व्यमृश्यत विद्वद्भिः तस्यां

राष्ट्रियसंगोष्ठ्याम्। प्राचीनकाले विद्यमानेषु विशिष्टेषु अयोध्या-मथुरावन्त्यादिषु यद् भव्यत्वं तत्तत्र विमृष्टं किं च तद्गतं दिव्यत्वमपि सम्यक् परामृष्टम्। तद्यथा - वाल्मीकिरामायणे अयोध्यायाः भव्यता इत्थं वर्णिता -

**रम्यचत्वरसंस्थानां संविभक्तमहापथाम्।**
**हर्म्यप्रासादसम्पन्नां गणिकावरशोभिताम्॥**

**रथाश्वगजसम्बद्धां तूर्यनादनिनादिताम्।**
**सर्वकल्याणसम्पूर्णां हृष्टपुष्टजनाकुलाम्॥**

**आरामोद्यानसम्पन्नां समाजोत्सवशालिनीम्।**
**सुखिता विचरिष्यन्ति राजधानीं (अयोध्यां) पितुर्मम॥**

(वा. रा. २/५/२१ - २३)

नगररचनायां न केवलं कस्यापि नगरस्य भव्यत्वं परिकल्प्यते स्म, अपि तु तस्य दिव्यतापि अभीष्टासीत्। अर्थात्, नगरे विद्यमानैः नागरिकैः कीदृशैः भवितव्यम् एवं चानुकरणीयनागरिकता कीदृशी भवेत् तादृशी दृष्टिरपि आसीत्। अयोध्यायां कीदृशानां नराणां वासः आसीदिति कथनप्रसङ्गे वर्णनमित्थमुपलभ्यते – तस्मिन् पुरवरे (अयोध्यायाम्) ईदृशाः जनाः आसन् - हृष्टाः, धर्मात्मानः, बहुश्रुताः, स्वैः स्वैः धनैः तुष्टाः, अलुब्धाः, सत्यवादिनः, नित्यं स्वकर्मनिरताः विजितेन्द्रियाः ब्राह्मणाः, दानाध्ययनशीलाः, प्रतिगृहे संयताः, देवतातिथिपूजकाः, कृतज्ञाः, वदान्याः, शूराः, विक्रमसंयुताः, दीर्घायुषः इत्यादि। तथा च कीदृग्नरः तत्र नासीदेवेति वर्णनप्रसङ्गे उक्तमस्ति, तदपि 'एकवचनप्रयोगद्वारा', तच्चेत्थम् - अयोध्यायां कश्चिदपि नरः अल्पसंनिचयः नासीत्, कश्चिदपि नास्तिकः, अनृती, अबहुश्रुतः, असूयकः, अशक्तः, अविद्वान्, अषडङ्गविद्, अव्रतः, असहस्रदः, दीनः, क्षिप्तचित्तः,

व्यथितः, अरूपवान् वा नासीत् (रामायणम् १/७/६)। एतेनेदं सुतरां विज्ञाप्यते यत् सत्य-श्रुति-व्रतादिसाद्गुण्येन सिद्धं यद् दिव्यत्वं तादृशेन दिव्यत्वेन पुष्टं सद् एव नगरं भव्यतायाः सार्थक्यं साधयितुं शक्नोतीति। अन्यथा तादृशं नगरं बाह्यवृत्त्या बृहत् विशालं भव्यं सदपि अन्तः दिव्यताऽभावकारणेन केवलं प्रासादनिचयः एव कथयितुं शक्यते, नान्यत् किञ्चित्। तादृशभव्यतादिव्यतासंयुक्तनगररचनाकौशलविमर्शप्रसङ्गे प्राचीन-भारतीयशिल्पशास्त्रानुसारं नगररचनाशास्त्रमत्र विमृष्टमस्ति। किं च द्वारकादिनगरवैष्ट्यं प्रस्तुतमस्ति। नगरेषु जलव्यवस्थादिविषया अपि विमृष्टाः। एतादृशप्रमुखबिन्दून् आदाय विमृष्टवतां लेखानाम् अनेन सङ्ग्रहेण आधुनिकनगररचनानीतिः लाभान्विता भवितुमर्हति।

प्रकाशनेऽस्मिन् प्रकाश्यमानलेखानां मान्या लेखकाः सुतरां श्लाघ्याः सन्ति। प्रकाशनेऽस्मिन् साम्पादक्यं निर्वहन्तो डॉ. ललितकुमार पटेल - डॉ. दीपेश कतिरा - श्रीजिगरभट्ट इत्येते वर्धाप्यन्ते। कुलसचिवः डॉ. दशरथ जादवः प्रकाशनेऽस्मिन् प्राशासनिकं प्रबन्धं पोषितवानस्ति इत्यतः सः अभिनन्दनीयोऽस्त्येव। संस्कृतवाङ्मये नगररचनेत्याख्यः एषः गम्भीरलेख-समवायः विदुषां पुरस्कारभाग् भवत्वित्येतदर्थं श्रीपरमेश्वरः श्रीसोमनाथः सुतरां सम्प्रार्थ्यते।

**गोपबन्धुमिश्रः**
कुलपतिः

ॐ

## प्रास्ताविकम्

श्रीसोमनाथसंस्कृतविश्वविद्यालयः वेरावलम्, सरदार पटेल युनिवर्सिटी, वल्लभविद्यानगरम्, विद्वत्परिषत्, संस्कृतभारती, गुजरातम्, इत्यत्तासां संस्थानां संयुक्ततत्त्वावधानेन "संस्कृतवाङ्मये नगररचना" इति विषयमधिकृत्य ६-७ मार्च् २०१९ दिनाङ्कयोः द्विदिवसीया राष्ट्रिया सङ्गोष्ठी आयोजिता। संस्कृतवाङ्मये अनेकेषु ग्रन्थेषु नगररचनाविषयकं निरूपणं कृतमस्ति अस्माकम् आचार्यैः। वास्तुशास्त्रम् अस्माकं भारतीयसंस्कृतेः विशिष्टम् अङ्गं विद्यते। वास्तुशास्त्रप्रतिपादितानि सिद्धान्तानि अद्यापि न केवलं भारतियैः अपितु वैदेशिकैरपि आचरणपथमानीयन्ते आद्रिन्ते च। संस्कृतसाहित्ये मयमतं, समराङ्गणसूत्रधारः, विश्वकर्मवास्तुशास्त्रम्, अग्निपुराणम् इत्यादिषुग्रन्थेषु प्रमुखतया वास्तुशास्त्रसम्बद्धम् निरूपणम् प्राप्यते, किञ्च रामायणम् महाभारतम् पुराणानि नाटकम् काव्यम् इत्यादिष्वपि नगररचनासम्बद्धं वर्णनं तथा विविधनगराणामपि वर्णनं प्राप्यते। इदं वर्णनं मुख्यतया द्विविधमस्ति – सैद्धान्तिकं वर्णनात्मकं च। संशोधनेन अद्यापि द्वारिका उज्जयिनि काशी पुरी लङ्का इत्याद्याः नगर्यः प्राप्ताः सन्ति यत्र प्राचीनं वास्तुशास्त्रम् शिल्पशास्त्रम् च अभिलक्ष्यते। एतस्यां सङ्गोष्ठ्यां विविधग्रन्थानुसारं नगररचनायां विविधानां नियमानां वर्णनानां च प्रस्तुतिः भारतस्य प्रसिद्धैः विद्वद्भिः कृता। परिसंवादे यानि शोधपत्राणि प्रस्तुतानि तानि ग्रन्थरूपेण अत्र प्रकटीक्रियन्ते। आहत्य कति लेखाः? कतिषु भावांषुः, लेखानां वैशिष्ठ्यम्, केषां कृते इमे लेखाः उपयुक्ताः। इदं प्रकाशनं विदुषां सामाजिकानां च कृते रुचिकरम् उपयोगि च भूयात् इति आशास्महे।

## संस्कृतवाङ्मये नगरे सामाजिकभवनविचारः

**जिगर एम. भट्ट**
आसी. प्रोफेसर
श्री सोमनाथ संस्कृत युनिवर्सिटी,
वेरावल।

यत्र अनेकाः जातयः निवसन्ति अनेके शिल्पिनः कलाज्ञातारः च निवसन्ति, यत्र च सर्वेषां देवानां समादरो भवति तत् नगरम् उच्यते।[१] भविष्योत्तरपुराणे नगरस्य चत्वारो भेदाः दृश्यन्ते – दीर्घं चतुरस्रं त्र्यस्रं वर्तुलं च।[२] नगा इव प्रासादा भवन्ति अत्र[३] इति व्युत्पत्त्या ज्ञायते नगरे उन्नतानि भवनानि स्युः। प्रसीदन्ति अस्मिन् जनाः इति प्रासादः। भवति अस्मिन्निति भवनम्। आभ्यां व्युत्पत्तिभ्यां सामान्यतया गृहं ज्ञायते। भवनमपि विविधं भवति। तत्र राजभवनम्, देवताप्रासादः, नागरिकाणां निवासभवनम्, सार्वजनिकानि सामान्यानि सामाजिकानि भवनानि च भवन्ति। सामाजिकं भवनं सर्वेषां कृते विविधकार्याय भवति। विद्यालयः ग्रन्थालयः न्यायालयः चिकित्सालयः प्रेक्षागृहम् इत्यादीनि भवनानि समाजाय सर्वजनाय च भवन्ति। संस्कृतवाङ्मये नगररचनासम्बद्धेषु ग्रन्थेषु अन्यत्र च एतेषां भवनानाम् उल्लेखः प्राप्यते। केषाञ्चन भवनानां कृते शास्त्रीयाः नियमाः भवन्ति। अत्र तान् नियमान् भवनानि तत्सम्बद्धम् अन्यच्च ग्रन्थप्रतिपादितं पश्यामः।

---

१ विष्णुपुराणस्य श्रीधरकृतटीकायाम्

२ दीर्घं वा चतुरस्रं वा नगरं कारयेन्नृपः।
तत्त्र्यस्रं वर्तुलं वाऽपि कदाचिदपि कारयेत् ॥ भविष्योत्तरपुराणम् २३\१२

३ शब्दकल्पद्रुमः।

## १- विद्यालयः

विद्यायाः आलयः विद्यालयः। यत्र शास्त्रैः सह शस्त्रादिज्ञानमपि भवति सः विद्यालयः कथ्यते। शास्त्रविद्या चतुर्दशसङ्ख्याका वर्तते–चत्वारो वेदाः षडङ्गानि मीमांसा न्यायः धर्मशास्त्रं पुराणानि चेति।[४] सर्वासां विद्यानामालयः विद्यालयः कुत्र कथञ्च निर्मातव्यः इति भणितं विश्वकर्मवास्तुशास्त्रे यथ – "ग्रामे पुर्यां वा शुभस्थाने प्रासादे भवने वा प्रमाणतः विद्यालयः निर्मातव्यः" इति।[५] अस्य कथनस्य तात्पर्यमस्ति यत् विद्यालयः शुभस्थाने भवेत्। प्रासादे वा भवने विद्यालयं कर्तुं शक्यते। वस्तुतस्तु विद्यायै गुरुः शिष्यश्च आवश्यकः। प्राचीनपरम्परायां तु वृक्षस्य अधः उपविश्य विद्याप्राप्तिर्भवति स्म। गच्छता कालेन पाठशालायाः कल्पना समुद्भूता अतः तन्निर्माणाय विचारः सञ्जातः।

विद्यालये गुरोः कृते आसनं भवेत्। विद्यालयः नगरे उत्तमे स्थाने भवेत्। तत्र च वेदशाला शास्त्रशाला परीक्षाशाला अभ्यासगृहं चैतेषां पृथक् रचना करणीया।[६] विद्यालयस्य उपरि विमानमिव शिखरं भवेत्। भित्तिकासु

[४] अङ्गानि वेदाश्चत्वारो मीमांसान्यायविस्तरः।
धर्मशास्त्रं पुराणञ्च विद्या ह्येताश्चतुर्दश ॥ म.भा.शान्ति. १२\१२२\३१

[५] प्रासादे भवने पुर्यां ग्रामे वा शुभवास्तुके।
विद्याशालामेकशैलीमेकसूत्रप्रमाणतः ॥ विश्वकर्मवास्तुशास्त्रम् ४०\१

[६] गुरुवेदीसमायुक्तां कल्पयेन्नगरोत्तमे।
शास्त्रशालान्वितां मध्ये वादस्थानसमन्विताम्॥
परीक्षास्थानसंयुक्तां क्लृप्ताभासगृहां तथा।
पाठशालां नृपः कुर्यात् पाठयेत् कुशलो गुरुः॥ तत्रैव ४०\८-९

देवानाम् ऋषीणां च चित्राणि स्युः। विद्यालये अलङ्कृताः मण्डपाः भवेयुः।[७] अनेन ज्ञायते यत् यत्र कुत्रापि विद्यालयः न स्थापनीयः। उत्तमे स्थाने विद्यालये निर्मिते सति विद्यार्थिनः सुन्दरम् अनुकूलं च वातावरणं लभन्ते। विद्यालये शास्त्राध्ययनस्य शास्त्रचर्चायाः परीक्षायाः स्वाध्यायस्य च कृते पृथक् प्रकोष्ठाः करणीयाः। देवतानां तथा ऋषीणां चित्रैः तात्पर्यम् अस्ति यत् तेन विद्याप्राप्तये वातावरणं भवति। अन्यथा अप्सरसां चित्राणि विलोक्य विद्यां प्राप्तुकामाः विद्यार्थिनः मार्गच्युताः भवन्ति। इत्थं वैज्ञानिकरीत्या विद्यालयनिर्माणविधानं निरूपितमस्ति।

**२- ग्रन्थालयः**

विद्यालयनिर्माणेन सह राज्ञा ग्रन्थालयस्यापि निर्माणं कर्तव्यम्। ग्रन्थालयनिर्माणेन शास्त्रसेवया च राज्ञः प्रजानां च ज्ञानं पुण्यं शुभकर्म च वर्धते।[८] शास्त्रसंरक्षणमिति कश्चन प्रकल्पः भवति राज्ञां काले, यस्मिन् उत्तमानां ग्रन्थानां प्रतिलिपीः कृत्वा प्रचारो भवति स्म। तेन ग्रन्थस्थ-ज्ञानस्य विस्तृतीकरणं व्यापकतया भवति स्म। अनया एव धिया ग्रन्थालयनिर्माणस्य कल्पना वास्तुशास्त्रे कृता वर्तते।

ग्रन्थालयस्य कृते शास्त्रशाला इति शब्दः तदानीं प्रसिद्धः आसीत्। इयं शास्त्रशाला कस्मिन् स्थाने विधेया इति निरूपितं विश्वकर्मणा – "राज्ञां श्रेष्ठिनां च प्रासादे, नीतिविमर्शो यत्र भवति तत्र, नगरस्य मध्ये, यत्र विदुषां मेलनं भवति तत्र च ग्रन्थालयस्य निर्माणं स्यात्। शास्त्रशाला चतुरस्रा भवेत्।

---

७ विमानशिखरोपेतां नानाचित्रमनोहराम् ।
सर्वालङ्कारसंयुक्तां पूर्वमण्डपशोभिताम् ॥ तत्रैव ४०\१०

८ पाठशालासमं राज्ञः शास्त्रसेवनमित्यपि।
ज्ञानवृद्धिकरं पुण्यं शुभप्रदमितीरितम्॥ तत्रैव २०\३३

तस्याः द्वारं प्राङ्मुखं स्यात्। शास्त्रशालायां त्रीणि आवरणानि भवन्ति। प्रथमावरणे वेदाः द्वितीयावरणे स्मृतयः तृतीयावरणे आर्षकाव्यानि ततः अन्ये न्थाः संस्थापनीयाः।[९] इत्थं नगरे ग्रन्थालयस्य निर्माणं व्यवस्थां च प्रकल्पयेत्।

### ३- न्यायशाला

राज्यव्यवस्थायाः प्रमुखम् अङ्गं न्यायः भवति। न्यायार्थं वेदेषु समितिः इति नाम श्रूयते। सामान्यतया राज्ञः सभायामेव न्यायो भवति स्म किन्तु विश्वकर्मवास्तुशास्त्रे न्यायशालायाः पृथक् निर्माणस्य कल्पना कृता वर्तते। न्यायशालायां सर्वे देवाः विराजन्ते। न्याये सामर्थ्यं शक्तिश्च वर्तते अतः न्यायशालायां प्राणिनां कल्याणं भवति। यः राजा गुणी स्थितधीः न्यायप्रियश्च भवति तेन अमात्य-पुरोहितैः सह न्यायशालायां न्यायः करणीयः।[१०]

विश्वकर्मणः मतानुसारं राज्ञः द्विविधम् आस्थानिकं भवति - न्यायशाला सभा च। तत्र सभा नाम सर्वेषां राज्ञां गुणिनां विदुषां च उपस्थितिः।[११] न्यायशाला नाम यत्र पद्मादिवत् उत्तुङ्गानि आसनानि भवन्ति, चत्वारि द्वाराणि भवन्ति, नयविदां सामन्तानां च कृते यत्र आसनानि भवन्ति सा न्यायशाला।

---

९ प्रासादे नीतिभवने पुराणामपि मध्यमे।
विदुषां मेलनस्थाने शास्त्रशालां प्रकल्पयेत्॥
चतुरस्रा शास्त्रशाला प्राङ्मुखाऽऽवरणत्रया ।
प्रथमावरणे वेदो द्वितीयावरणे स्मृतिः।
तृतीयावरणे चार्षं वेदानथ परः पुमान्॥ तत्रैव २०\३१-३२-३३ पू.

१० न्यायशाला तु कथिता सर्वदेवमयी शुभा।
सर्वशक्तिमयी सर्वप्राणिनां क्षेमवर्धिनी ॥
गुणाढ्येन स्थितधिया भूभर्त्रा नयचक्षुषा।
सा सेव्या लोकरक्षार्थं सहामात्यपुरोहितैः॥ तत्रैव १६\५-६

११ सार्वभौमादिभूपानां गुणिनां नयचक्षुषाम्।
आस्थानिकं द्विधा प्रोक्तं न्यायशाला-सभाक्रमात्॥ तत्रैव १६-१

न्यायशाला चतुरस्रा भवति।[१२] स्थानभेदेन न्यायशाला द्विधा – देश्या पौरा च। या न्यायशाला राज्ञः इच्छया अनुकूलाय कार्याय भवति, यत्र च धनसंरक्षणाय कोशागारः भवति सा देश्या।[१३] पौरा न्यायशाला नाम डिस्ट्रिक्ट कोर्ट। तत्र चक्रवर्तिनः सम्राजः युवराजस्य अन्यराज्ञां सामन्तानां च उपस्थितिः भवति सा पौरा कथ्यते।[१४] लक्षणेन एव द्वयोः भेदः महत्त्वं च ज्ञायते। एका राजकार्यस्य अनुकूलतायै लघुकार्याय च भवति अपरा च विशेषकार्याणां कृते भवति। सम्प्रति एतयोः उपरि अपि उच्चन्यायालयः उच्चतरन्यायालयः च वर्तेत।

## ४- धनशाला (बेन्क)

धनशाला अर्थात् कोशसदनम्। इदं कोशसदनं नगरे योग्ये स्थाने प्रासादे वा भवने भवितुं शक्नोति। भवनम् अर्थात् सामान्यं गृहम्। ग्राम्याणां नागरिकाणां च धनसंरक्षणाय इदं कोशसदनं भवति।[१५] कोशसदनस्य प्रमाणं त्रिदण्डं चतुर्दण्डं पञ्चदण्डं वा स्यात्। इदं कोशसदनं प्राकारभवनयुक्तं

[१२] पद्माधिष्ठानसंयुक्तां चतुर्दिग्द्वारभूषिताम्।
नयवाद्यासनोपेतां सामन्तासनसंयुताम्॥
शालाकारां सभाकारां चतुर्लां चतुरस्रकाम्।
न्यायशालां प्रकुर्वीत राजा शासनतत्परः॥ तत्रैव १६\८-९

[१३] भूपालस्येच्छया वापि राजकार्यानुकूलतः। कोशागारयुतां देश्यां कल्पयेत् तां सदेवताम् ॥ तत्रैव १६\१०

[१४] चक्रवर्तेः पट्टभाजो युवराजस्य भूभुजः। नरेन्द्रस्य क्षत्रियस्य महाराजस्य भूपतेः॥
सामन्तस्य महीनेतुरासनेन समुज्ज्वलाम् ।
पौरां तु न्यायशालाख्यां मानसूत्रेण कल्पयेत् ॥ तत्रैव १६\११-१२

[१५] पौरं तु कोशसदनं प्रासादान्तर्गन्तु वा।
प्रजावित्तस्य रक्षायै धीमान् राजा प्रकल्पयेत् ॥ तत्रैव १८\१६

सशस्त्रसैनिकसमन्वितं च भवेत्।[१६] तेन कोशसदनस्य रक्षा भवति। कोशसदने कार्यकतृणाम् आसनैः सह त्रिषु आवरणेषु तिस्रो देव्यः स्थापनीयाः। तत्र प्रथमावरणे दीपदेवी, द्वितीये चामरग्राहिणी, तृतीये च आशीर्वचनकारिणी देवी स्थापनीया। देवी इत्यनेन प्रतिमा ग्राह्या। एताभिः प्रतिमाभिः यशः धनं जयः सततं वर्धते।[१७] इत्थं नगरे धनशालायाः निर्माणविधिः निरूपितः अस्ति वास्तुशास्त्रे।

## ५- प्रेक्षागृहम्

प्रेक्षागृहं नाम वर्तमानं चलचित्रगृहम्। पुरा नाटकानि द्रष्टुं यत् गृहं भवति स्म तत् प्रेक्षागृहम् उच्यते। भरतनाट्यशास्त्रे त्रिविधं प्रेक्षागृहम् अभिलक्षितमस्ति – विकृष्टं चतुरस्रं त्र्यस्रम् इति। तेषां त्रीणि प्रमाणानि सन्ति– ज्येष्ठं मध्यम् अवरम् चेति।[१८] अष्टोत्तरशतं हस्तपरिमितं प्रेक्षागृहं ज्येष्ठम्, चतुष्षष्टिहस्तपरिमितं प्रेक्षगृहं मध्यमम्, द्वात्रिंशद्धस्तपरिमितं च प्रेक्षागृहम् अवरम् उच्यते।[१९] तेषु ज्येष्ठं प्रेक्षागृहं देवानाम्, मध्यमं नृपाणाम्, अवरं च अन्यासां प्रकृतीनां भवति।[२०] या भूमिः समाना स्थिरा कठिना च

---

१६ सप्राकारं सदुर्गं वा सप्तभित्तिसमन्वितम्। दण्डत्रयं चतुर्दण्डम् अथवा पञ्चदण्डकम्।
मध्यभागप्रमाणञ्च स्थापयेत् सूत्रमानवित् ॥ तत्रैव १८\१९-२० पू.

१७ प्रथमावरणे दीपदेवी स्थाप्या सहासना। द्वितीयावरणे देवी चामरग्राहिणी तथा॥
तृतीयावरणे देवी चाशीर्वचनकारिणी।
एवं देवीत्रयं स्थाप्यं यशोधनजयप्रदम्॥ तत्रैव १८\२४-२५

१८ विकृष्टश्चतुरस्रश्च त्र्यस्रश्चैव तु मण्डपः।
तेषां त्रीणि प्रमाणानि ज्येष्ठं मध्यं तथाऽवरम्॥ नाट्यशास्त्रम् २\८

१९ अष्टाधिकं शतं ज्येष्ठं चतुष्षष्टिस्तु मध्यमम्।
कनीयस्तु तथा वेश्म हस्ता द्वात्रिंशदिष्यते॥ तत्रैव २\१०

२० देवानां तु भवेज्ज्येष्ठं नृपाणां मध्यमं भवेत्।
शेषाणां प्रकृतीनां तु कनीयः संविधीयते॥ तत्रैव २\११

भवति, वर्णेन च कृष्णा गौरी वा भवति तत्रैव प्रेक्षागृहं करणीयम्।[२१] अनेन ज्ञायते यत् या भूमिः मृद्वी भवति रक्तवर्णा च भवति तत्र नाट्यगृहं न करणीयम्।

नाट्यगृहं निर्माय तस्य भित्तिकासु सुधाकर्म करणीयम्। सुधालेपने सति भित्तिकासु चित्राण्यपि करणीयानि। चित्रेषु पुरुषाः स्त्रियः लताः पुष्पाणि च विधेयानि।[२२] प्रेक्षकाणाम् उपवेशनव्यवस्था सोपानाकृतया कार्या येन अग्रे उपविष्टानां शिरः मध्ये बाधां नोत्पादयेत्।[२३] सम्प्रति चलचित्रगृहेष्वपि एतादृशी व्यवस्था एव दृश्यते। प्रेक्षागृहस्य कृते अन्येऽपि नियमाः वर्तन्ते तदत्र विस्तरभयात् न लिख्यते।

- **उपसंहारः**

इत्थमत्रास्माभिः अवलोकितं यत् पुरातने काले नगरे सामाजिकानि भवनानि कीदृशाणि भवन्ति स्म। एतेषां भवनानां कृते ये नियमाः प्रोक्ताः त एव सम्प्रति अपि किञ्चिदिव परिवर्तनेन सह अस्माभिः अवलोक्यन्ते। न्यायशाला पाठशाला ग्रन्थालयः कोशसदनं प्रेक्षागृहञ्च नामपरिवर्तनस्य नूतनानि वस्त्राणि धृत्वा अस्माकं पुरतः वर्तन्ते किन्तु वास्तुशास्त्रसम्बद्धेषु नगररचनासम्बद्धेषु च ग्रन्थेषु एतत्सम्बद्धं निरूपणम् आचार्यैः कृतमेवास्ति। नगररचनायाः नियमाः विशालेषु ग्रन्थेषु सन्त्येव, अत्र केवलं सामाजिकभवननिर्माणविचारः यथामति प्रस्तुतः इति शम्।

---

२१ समा स्थिरा च या भूमिः कृष्णा गौरी च या भवेत्।
भूमिस्तत्रैव कर्तव्यः कर्तृभिर्नाट्यमण्डपः॥ तत्रैव २\२८

२२ तत्रैव २\८७-८८-८९

२३ तत्रैव २\९६

## सन्दर्भग्रन्थाः

१. **भविष्योत्तरपुराणम् -** सम्पादकः = गीताप्रेस , गोरखपुर-१९९२

२. **शब्दकल्पद्रुमः**
सम्पादकः = राजा राधा कान्तादेव, नाग प्रकाशन, दिल्ली-२००६

३. **महाभारतम् -** सम्पादकः = परशुराम लक्ष्मण वैद्य,
भाण्डारकर ओरिएन्टल रिसर्च इन्स्टीट्यूट, पूना

४. **विश्वकर्मावास्तुशास्त्रम्**
सम्पादकः = के.वासुदेव शास्त्री, सरस्वती महल पुस्तकालय, तन्जौर

५. **नाट्यशास्त्रम्**
सम्पादकः = बच्चूराम अवस्थी, चौखम्बा संस्कृत सीरीज, वाराणसी